श्रीसहजानंदायनमः॥ अथैकविंशतिश्रियमच्छामृतादिव दिव्यमल्लादौ संक्षेपतस्तं वर्णयति युग्मेनाह ततइति
ततो दुर्गपुरागमनानंतरं स्वेषां स्वकीयभक्तजनानां हितं प्रियं तत्र प्रसक्तस्तत्सरः समाहूताः आकारिताः निजाः
स्वकीयाः नु सर्वे भक्ता येन स तथोक्तः ईशाः सर्वनियंता वरं श्रेष्ठं यदासनं तत्र तिष्ठतीति तथोक्तः तैराहूतैरुभक्तैः
परिवेष्टितोऽहतो हरिः भगणैर्नक्षत्रव्रजैः परिवेष्टितो विभावर्या रात्र्यां इंदुश्चंद्र इव विरेजे चकासे॥१॥ परिस्फुरदि

ततः समाहूतनिजोरुभक्तो हरिर्विरेजे स्वहितप्रसक्तः॥ वरासनस्थः परिवेष्टितस्तैर्विभावरीन्दुर्भगणैरिवेन्दुः॥१
परिस्फुरत्तारकलोचनाभ्यां निरीक्षमाणः परितो दयालुः॥ भक्तव्रजान्कोकनदं प्रफुल्लं विलज्जयंश्चंचलभृंगतु
ष्टम्॥२॥ नासोपसंस्पृक्तरदोल्लसाभं तदीयलीलास्मितमीक्षणीयम्॥ अधश्चकार क्षितिजप्रवालपर्यस्तमुक्ता
तुनहैमनीरम्॥३॥ तिदयालुः अतिकृपया येन सतथोक्तो दयालुः प्रसयः तेनानवधिकातिकृपयादयावानित्यर्थः परि
स्फुरती चंचले तारके कनीनिके ययोस्ते तथाभूते ये लोचने ताभ्यां तारकाक्ष्णः कनीनिके समरः परितः सर्वतः
भक्तव्रजान् भक्तसमूहान् निरीक्षमाणः अतएव चंचलो यो भृंगस्तेन जुष्टं सेवितं प्रफुल्लं विकचं कोकनदं रक्तो
त्पलं विलज्जयन् लज्जां प्रापयन्॥२॥ नासेति नासोपस्पृक्तोऽधरः अधरस्तत्र संपृक्ता मिलिता रदानां दंतानाम् ॥१॥

उज्ज्वलाशुभा आभाकांतिर्यस्य तत्तथोक्तं ईक्षणीयमतिरमणीयत्वाद्द्रष्टुं योग्यं तदीयं तस्य श्रीहरेः संबंधि य
ल्लीलास्मितं विलासेन मंदहसनं क्षितिजस्य वृक्षस्य प्रवाले पल्लवे पर्यस्तं पतितं यन्मुक्तातु नं मौक्तिकं धवलं
हैमनीरं हिमसंबंधिजलम् अधश्चकार ततोप्यधिकतया बभासेत्यर्थः॥३॥ हरिरिति स्मितेन भासुरं शोभमा
नमास्यं मुखं यस्य स तथोक्तः अतएवउत्तमानि उत्कृष्टानि विचित्राणि नानाविधानि माल्यानि पुष्पाणि तेषां म
नोज्ञाः सुंदरा ये हारास्तेषु व्यतिषंगः आसक्तिः तं भजतीति तथोक्तास्तान् मिलिंदान् मधुपान् वलक्षतां शुभ्र

हरिर्नयन्नुल्लसविचित्रमाल्यमनोज्ञहारव्यतिषंगभाजः॥ अर्थ्यान्मिलिंदान्स्मितभासुरास्यो वलक्षतां वाचमुवा
चरम्याम्॥४॥ वेदाः समग्रोपनिषत्समेता व्यासेन सूत्राणि समीरितानि॥ कृष्णोदिताभागवतं च गीता श्रीभार
ते सद्भिरुरोक्तनीतिः॥५॥
तंनयन् प्रापयन् हरिः रम्यां अर्थ्यां अर्थादनपेतां वाचं वाणीम् उवाच जगाद॥४॥ वे
दाइति समग्राया उपनिषदस्ताभिरंगोपांगादयस्ताभिरुपेता युक्ताः वेदाः आम्नायाः व्यासेन पराशरात्मजेन स
मीरिता उक्तानि सूत्राणि शारीरकाख्यसूत्राणीत्यर्थः श्रीभारते सर्वेतिहाससारभूते भारताख्ये ग्रंथे कृष्णे
न श्रीकृष्णेनार्जुनं प्रतिसुता गीता श्रीभगवद्गीता सत्सौख्यो यो विदुरस्तेनोक्ता धृतराष्ट्रं प्रत्युपदिश्यमाना

नीतिः विद्धरतीति भागवतम् द्वादशस्कंधात्मकं कृष्णद्वैपायनप्रणीतं श्रीमद्भागवताख्यपुराणं च सच्छा
स्त्रं ज्ञेयमिति शेषः ॥५॥ नाम्नामिति श्रीभारते इत्यनुषंगः गंगाद्याः भवो जन्म यस्य स गंगाभवो भीष्मस्तेन गदि
तमुक्तं श्रवणयोः कर्णयोरभिरामं प्रियं तथोक्तं विष्णोर्नाम्नामभिधानानां सहस्रं विष्णुसहस्रनामेत्यर्थः स्कां
दीयः स्कंदपुराणसंबंधी मनुश्रेष्ठो यो वैष्णवखंडस्तत्र संस्थं स्थितं श्रीवासुदेवमाहात्म्यपदं यस्य तत्तथाभूतम्

नाम्नां सहस्रं गदितं च विष्णोर्गंगाभवेन श्रवणाभिरामम् ॥ स्कांदीयसद्वैष्णवखंडसंस्थं श्रीवासुदेवोपपदं महित्वम्
६ ॥ रामानुजाचार्यकृतं सुगीताभाष्यं च शारीरकसूत्रभाष्यम् ॥ आध्यात्मिकं संमतमुत्तमं मे मदाश्रितैरित्यवसेय
मेतत् ॥७॥ स पंचमो यो दशमो मदीयैः स्कंधो महाभागवतस्य वेद्यः ॥ सर्वाधिकत्वेन भवापहर्तुर्माहात्म्यबोधाय
बलानुजस्य ॥८॥

हित्वं माहात्म्यं वासुदेवमाहात्म्यमित्यर्थः ॥६॥ रामानुजेति रामानुजाख्यो य आचार्यस्तेन
कृतं तथोक्तं सुष्ठु यथा गीतायाः श्रीमद्भगवद्गीताया भाष्यं तु उत्तमं श्रेष्ठम् शारीरकसूत्राणां तदाख्यानां व्याससू
त्राणां भाष्यं च आध्यात्मिकं ज्ञानशास्त्रमिति मे मया संमतं इत्यमुना प्रकारेण मदाश्रितैरेतद्भाष्यद्वयं ज्ञान
शास्त्रमवसेयमवगम्यं ज्ञेयमिति यावत् ॥७॥ स पंचम इति महाभागवतस्य श्रीमद्भागवताख्यपुराणस्य ॥२॥

स पंचमः पंचमस्कंधेन सहितो यो दशमः स्कंधः सः भवापहर्तुः शरणागतसंसारनिवर्तकस्य बलो रोहि
णीपतिर्बलदेवस्तस्य यः अनुजः श्रीकृष्णस्तस्य माहात्म्यं महिमा तस्य बोधो ज्ञानं तस्मै सर्वेभ्यः स्कंधेभ्यः
अधिकत्वमाधिक्यं तेन मदीयैर्मदाश्रितैर्भक्तजनैः वेद्यो ज्ञेयः तन्महित्वबुभुत्सया पंचमदशमस्कंधौ सर्व
स्कंधेभ्यो विशेषतः परिशीलनीयाविति भावः ॥८॥ आचारेति आचारो मुख्यो येषां ते तथोक्ताः आचार
व्यवहारप्रायश्चित्तैरित्यर्थः सहसहितात्तस्मृतिपादिनीत्यर्थः समिताक्षरा मिताक्षराख्या विज्ञानेश्वरकृता

आचारमुख्यैः सहया याज्ञवल्क्यस्मृतिर्भवद्भिः समिताक्षरा च ॥ श्रेयांसि मेष्टाविति सच्छ्रुतानि मान्यानि मत्तः सन्म
तिदानि तानि ॥९॥ इत्याहृतास्तस्य निशम्य वाचं प्रसेदिवांसः सलिलकैः सदस्याः ॥ प्रसूनहारादिभिरार्च्य यं स्ते
तदुक्तमार्गस्थेषु रतिं प्रपन्नाः ॥१०॥

याटीका तया सहिताया याज्ञवल्क्यस्य कृष्णेः स्मृतिश्चेति अष्टौ सच्छ्रुतानि
सच्छास्त्राणि मे मम श्रेयांसि अतिप्रियाणि संति जीवानां सति भगवति पत्तिं श्रेयो बुद्धिं ददंतीति तथोक्तानि सं
ति अतो अस्माद्धेतोः तानि सच्छास्त्राणि भवद्भिः मान्यानि माननीयानि ॥९॥ इतीति इत्यमुना प्रकारेण तस्य
श्रीहरेः वाचं वाणीं निशम्य श्रुत्वा प्रसेदिवांसः प्रसन्नाः तेन हरिणा उक्तानि यानि सच्छास्त्राणि तेषु रतिं प्रा

तिं प्रपन्नाः प्राप्ताः सदः स्थाः सभानिषण्णाः ते सर्वे भक्तजनाः आहृताः आदरवंतः संतः तिलकैः छंदनैः प्रसून
स्रैः हारात् आदयो येषां गोरखरादीनां तैः तमिति शेषः श्रीहरिं आर्चयन् अपूजयन् ॥१०॥ ततः इति ततः स्व
शिष्यनृपात्स्रोऽनंतरं असंख्यान् अपरिमितान् येऽतीवास्ते बामुद्धरणं संसारसागरान्मोक्षणं तं स्ये मुनीन् प्राणामा
धूनां वृंदानि समूहास्तैः सार्द्धं सह तीर्थेषु विषये व्रजन् विचरन् सः श्रीहरिः तत्र तेषु तीर्थेषु जनानां व्रजाः स
मूहास्तेषामाश्चर्यं विस्मयस्तस्य विधा विकारकं अन्नसंरभजनन विस्मापनमिसर्थः निजं स्वकीयं यदैश्वर्यं स

ततः स तीर्थेषु मुनीन् दृष्टे रसंख्यजीवोद्धरणाय सार्द्धम् ॥ जनव्रजाश्चर्यविधायि तत्र व्रजन्निजैश्वर्यमपी प्रथत्सः
११॥ निद्वक्स्तनेकेषु भजंस्तमीनां विधाय तत्साम्ययमंगभाजः ॥ क्षेत्रेषु पुण्येषु तपस्तनूजः स विस्मुयागादिमखां
श्चकार ॥१३॥

द्यः समाधिविधापनात् इति तत् अयी पृथ्वत् विस्तारयामास पृथ्य प्रक्षेपे अस्माच्चोरादिकाल
त्तेरिलुङ् च्लिलुङीति च्लेः णिश्रिद्रुस्रुभ्य इत्यादिना सिचोपवादश्चङ् णेरनिटीति णिचो लोपः उर्ऋदिति सूत्रे
णारोपवादऋकारः चङीति द्वित्वं सन्वल्लघुनीत्यादिना भ्यासस्येत्वं दीर्घो लघोरित्यभ्यासस्य दीर्घः लुङ् लं
ङ् माङीत्यादिना गस्याडागमः ॥११॥ निद्वक्स्वि निअनेकेषु बहुषु निद्वक्क देशेषु अंगभाजः शरीरधारिणः तस्य ॥३॥

श्रीहरेः आश्रयं विधाय कृत्वा ईश्वरान् शरणागतसकलायन्निराकरणे समर्थं तं श्रीहरिं अभजन् श्रवणादि
नवविधभक्तिभिः सिषेविरे किंच तपसो धर्मस्य तनूजः पुत्रः सः श्रीहरिः पुण्येषु पूतेषु क्षेत्रेषु विष्णुर्याग आ
दिर्येषां तेन तथोक्ता ये मखा यज्ञास्तान् चकार विदधे ॥१२॥ एकादश्यां इति सदृ इति शेषः एकादशी मुख्या येषु तानि
तथोक्तानि यानि महाव्रतानि तेषु हरेः मस्य जनुर्जन्म तस्य दिनानि जन्माष्टमी रामनवम्यादीनि तेषु च । विप्रा
णां वर्द्धमेरानंदिताः प्रहर्षिता भूमिदेवा येन स तथोक्तः सन् । चारुतरैरतिरम्यैरुपचारैः सामग्रीभिः महोत्सवा

एकादशीमुख्यमहाव्रतेषु महोत्सवान् कृष्णजनुर्दिनेषु ॥ अचीकरच्चारुतरोपचारैर्विप्राणनानंदितभूमि
देवः ॥१३॥ सतीर्थदेवालयवाडवानां हरेः स्वधर्मादियुजः सभक्तेः ॥ चकार हिंसारहितक्रतूनां संस्थापनं क्षो
णितले दयालुः ॥१४॥

नु महामहान् । अचीकरत् । कारयितवान् । हेतुमणिजं तात्करोतेः कर्त्तरि लुङ् दृदं विह
पितं त्वस्योपशिक्षणार्थं न तु तेनावाप्तव्यं किंचिदस्ति स्वस्य पूर्णकामत्वादिसवसेयम् ॥१३॥ सतीर्थेति दया
लुः परदुःखासहिष्णुः सः श्रीहरिः क्षोणितले महीतले संतः साधवः तीर्थानि देवालयानि देवमंदिराणि च
वाडवा विप्राश्च तेषां स्वेन वर्णाश्रममेव स्थया विहितो यो धर्मः स आदिर्येषां तानि ज्ञानवैराग्यमाहात्म्या

हरिसं· वेदनानितेर्पुनर्भक्तियोगंप्राप्नोतीतितथोक्ताप्याः हरेः भक्तेः हिंसाप्रकाररहितावर्ज्जितापेक्षितवोपदृशास्तेषांच सर्ग-१७
॥४॥ संस्थापनंचकारविदधे॥१४॥ततइति ततस्तीर्थादिषु धर्मादिस्थापनानंतरं भूमौक्षितौचरन् विचरन् आ
त्मतंत्रः स्वतंत्रः सः श्रीहरिः बंधुजनैः संबंधिजनैः सार्द्धंसह उदारंस्वभक्ताभ्यर्थितमिष्टापिनंहरिभजताम्भ
यंदइति आढ्योनामयस्यसतेन उत्तमपवित्रान्नृपेणराज्ञागुप्तंरक्षितंदुर्गपुरंपुनःप्रपेदेप्राप॥१५॥अथेति
अथदुर्गपुरप्राप्त्यनंतरंससंभ्रमेणसादरेणतेनाभयसंज्ञराज्ञाभूपतिनाप्रार्थितः अत्रास्मत्सन्निधौसफलीकर्त्तुं

ततः पुनर्दुर्गपुरंप्रपेदेचरन्नसम्भूमावभयाह्वयेन॥सार्द्धंहरिर्बंधुजनैरुदारंनृपेणगुप्तंभजतात्मतंत्रः॥१५
अभ्यर्थितस्तेनससंभ्रमेणसतस्यसौधंभगवानध्युवास॥तत्राययुस्तद्भिुतभक्तवारास्तदीयनिधानवि
धित्सुमानाः॥१६॥ मत्कुलमस्ततानिर्वाणायपरमदयतानिवसेतिनितरांप्रार्थितः सः श्रीहरिः तस्यअभ
यराज्ञः सौधंराजसदनम् अध्युवासतस्मिन्निवासंकृतवानित्यर्थः अधिवासः स्थानं कर्मेतिकर्मत्वम्॥
अथेतिचोषः तन्निवासविधानानंतरम् तत्रदुर्गपुरेतदीयंतस्यश्रीहरेरिदंयन्निधानंदर्शनंतद्विधित्सु
मानाः चिकीर्षमाणाः निर्वर्णनंतुनिधानंदर्शनालोकनेक्षणमितिअमरः तद्भिुतभक्तवारास्तदाश्रितभ ॥४॥

क्तसमूहाः आययुः आजग्मुः तद्दर्शनायतत्रबहवोभक्ताआययोनितिस्पष्टोर्थः॥१६॥संबंधिनइति अथदुर्ग
पुरनिवासानंतरंतस्यश्रीहरेः विधुरंविश्लेषःसएवतग्रस्तीव्रोवह्निरग्निः तेनप्रदह्यमानाः परितप्यमानाः
अंगान्येवलतावद्यषांयेषांतेतथोक्ताः तद्विरहमव्याकुलाइत्यर्थः तस्यश्रीहरेरिमेतदीयाः संबंधिनोरामप्र
तापादयः तंश्रीहरिंपरिदृष्टुंनिरीक्षितुंकामायेषांतेदर्शनाभिलाषिणइत्यर्थः दृष्टोदरादेराकृतिगणत्वाल्लेन
संग्रहीतात् लुंपेदवश्यमः कृत्येतुकाममनसोरपीतिवाक्यान्मलोपः तथाभूताः संतः निदाघेनतापेनतप्ताः

संबंधिनस्तद्विधुरोग्रवह्निप्रदह्यमानांगलतास्तदीयाः॥अथाययुस्तंपरिदृष्टुकामानिदाघतप्ताइवसिं
धुपूरम्॥१७॥रामप्रतापःसहनंदरामस्सुखैःकृतैरागमदुत्कचेता॥तदग्रजन्मासहधर्मपत्न्यास्वधर्मनिष्ठोह
रिभक्तिसक्तः॥१८॥ सिंधुपूरमिवनदीप्रवाहमिवआययुः आजग्मुः॥१७॥रामप्रतापइतिस्वस्ययोवेदोदि
तोधर्मस्तस्मिन्निष्ठास्थितिर्यस्यसतथोक्तः हरेर्यानवलक्षणाभक्तिस्तस्यांसक्तः आसक्तः रामप्रतापस्तन्ना
मातस्यश्रीहरेरग्रजन्माज्येष्ठभ्रातानंदरामोमुखंमुखमोयेषांतैः कृतैस्त्रिभिः पुत्रैःसहधर्मस्यपत्नीधर्मार्थपत्नी
अथवासादिवत्तादर्थ्येषष्ठीसमासः तयासहउत्कनदर्शनोत्कंठचेतोयस्यसतथोक्तः सन्आगमत्आययौ॥१८

तस्येति किंचेतिचार्थः प्रीतियुतः श्रीहरेरत्रागमवान् स्वकीयोयोधर्मस्तस्मिन्स्थिरतांनिश्चलतां अवाप्तः
प्राप्तः प्रशान्तस्वभावोयस्यसतथोक्तः रमणीयंरूपंयस्यसतथोक्तः इच्छारामइत्यभिधानामयस्यसत
थोक्तः तस्यश्रीहरेः अनुजःकनिष्ठभ्राता आत्मनःस्वस्ययानारीतयासहसार्द्धं आगमत्॥ आययौ॥ १९॥
गोपालसंज्ञइतितस्येच्छारामस्यतनुजःपुत्रः मेनाभ्युपेतः मेनाख्ययास्त्रियायुक्तःसन् आगमत्॥ विरजयातं

तस्यानुजः प्रीतियुतःसहेच्छारामाभिधस्त्वागमदात्मनाम्न्या॥ स्वकीयधर्मस्थिरतामवाप्तःप्रशान्तसत्त्वोरमणी
यरूपः॥१९॥ गोपालसंज्ञोरघुवीरनामा मेनाभ्युपेतोविरजासमेतः॥ वृंदावनस्तत्तनुजश्चसीतारामाभिधा
नोवदरीनाथकृतिः॥२०॥ निरामयतोबंधुजनैर्हयेतौसमागतौसादिगणैःपरीतः॥ हयेत्तगामाभिमुखंनिषण्णस्त
योःश्रितौघैःसहसप्रतीतैः॥२१॥ दारस्ययास्त्रियासमेतोयुक्तोरघुवीरनामातत्तनुजश्चागमत्॥ वृंदावनो॰
वृंदावनाभिधानःतत्तनुजश्च आगमत् सीतारामइतिअभिधानंनामयस्यसतथोक्तस्तत्तनुजः आगमत्
वदरीनाथइतिकृतिरभिधायस्यसतथोक्तस्तत्तनुजः आगमत् गोपालादिपंचपुत्रैःसहेच्छारामस्तदनुजन्मा
गमदितिसर्थः॥२०॥ निरामयेतियुग्मेनाहसश्रीहरिः बंधुजनैःजुंपतौयुक्तौतौभ्रातरौरामप्रतापेच्छारामौसमा ॥५॥

गतौनिरामयश्चतुर्विहयेतुरगेनिषण्णउपविष्टः सादिगणैरश्ववारसमूहैःपरीतोवृतःसन्प्रतीतैस्तदागम॰
श्रुतिप्रसन्नैःश्रितौघैःस्वशरणमुपगतभक्तजनसमूहैःसहतयोर्भ्रात्रोरभिमुखंसन्मुखंजगामययौ॥२१॥
प्रसंगात्तदश्वगतिमैत्यष्टचंविवृणोतिसान्निध्यमितिजवस्यगमनवेगस्यपक्षोष्टवंचारुत्वंतदध्येतुमिवयावि
तुमिवरजसोरेणोःछलोमिषंतेनरेणुद्वयोः स्त्रियांधूलिःपांशुर्नानद्वयोरजइत्यमरः सान्निध्यंसामीप्यंप्रपन्नैः
प्राप्तैः अणुःपरमाणुद्वयंप्रमाणंपरिमाणंयेषांतानितैस्तथोक्तैः अणुपरिमाणंमनइतिनैयायिकाः

सान्निध्यमध्येतुमिवप्रपन्नैरणुप्रमाणैर्जवसौष्ठवंसः॥ रजश्छलेनांगभृतांमनोभिर्विद्रावयन्नर्चितपादपद्म॰
म्॥२२॥ अचीकरच्चंचलचारुचारंसतेनसैंधवमुदावहेन॥ अद्यापियंयातिपकगत्वरेणनतंमहाभ्यासरतः
समीरः॥२३॥ अंगभृतांदेहभाजांमनोभिःस्वांतैःअर्चितौपूजितौपादौचरणौयस्यतंतथोक्तं अश्वंहयंविद्रा
वयन् धावयन्॥२२॥ अचीकरदितिसःश्रीहरिःगोभनोयोऽश्वस्तंविदंतीतिसैंधवश्चाः तदधीतेतद्वेदेतिवे
दितव्यंएतद्वित्तेघवामादेरितिप्राप्तामाद्यचोवृद्धिर्नखाभ्यांपदांताभ्यांपूर्वौतुताभ्यामैजितिप्रथमतोनि॰
षिध्यपदांतवकारात्पूर्वमैजागमोविहितः ततोवृद्धिः तेषामुदावहोहर्षप्रापकस्तेनतथोक्तेनसकगत्वरेण

स्कंदरगतिनातेनाश्वेनयं चंचलस्तरलश्चारुः स्कंदरश्च यश्चारोगतिविशेषस्तं अचीकरत् अदीधपत् नंचारं
महाभ्यासोबहुभ्यासस्तत्ररतः प्रीतिमान् चक्रवातरूपेण शिक्षितुमभ्यसन्निसर्थः समीरोवायुः अद्यापि
नयातिनप्राप्नोति तद्गतिचातुर्यमनप्राप्तइत्यर्थः॥३३॥एकांघ्रिणेतिहरिर्वामनः एकांघ्रिणाएकचरणे
नयत् अप्रमाकात्रांमतिचक्रमे अतिक्रमणंचक्रेपदैः सर्वपादमासैः तस्याश्वस्य अतिक्रमेप्युद्धंघ
नेहृतेसस्यपि अवतारिणः सर्वावतारधारिणः पुरुषोत्तमस्यश्रीहरेः उत्तमवाहनस्यमेममलज्ञाश्चादि

एकांघ्रिणाभ्रंयमतिचक्रमेयस्देहैर्हरिर्मितदतिक्रमेपि॥लज्जावतार्थ्युत्तमवाहनस्यनेतिमधाद्ध्र्वतरक्रमः
सः॥३४॥उच्चैः सतेनार्द्धपुलायितेनमचीकरच्चित्रपदंवरेण॥ कत्राक्षयन्नष्टदुलांघ्रियातंतेजःप्रबंधैःचहि
तःसमत्वे॥३५॥ तिहितोः ऊर्ध्वतरोऽसुन्नतः क्रमः पादमासोयस्यसतथोक्तः सः हयः तदितिनोषः नभोलंघ
नंनमधात् नचकार॥३४॥उच्चैरिति तेत्रोनामहयानां दर्पापरनामासत्वगुणविकारप्रकात्रोत्तः सारविशेषः
तथाहभोरोज्जरजः तेजोनिसर्गजंसत्वं वाजिनांस्फुरणंरजः क्रोधस्तमइतिद्वेपास्त्रयोपिसहजागुणाइति
तच्चद्विविधम् सततोत्थितंभयोत्थितंचेतियथाहसएव धाराकयोजितानांचनिसर्गोत्तेरणंविनाप्रविछि॥ ॥६॥

त्तमिवाभातितत्तेजः सततोत्थितंकन्नापादादिघातैर्यत्माध्वस्यस्फुरितंहितत अत्रतेजः न्नाद्धेनतत्कार्यंजवो
लक्ष्यतेतथाचतेजसिजवप्रबंधेतल्लिवारणेसमत्वेजवसाम्येचावहितोवत्नाविभागनिपुणइत्यर्थः कत्राता
डनीअष्टादेत्नाडनीकसेसमरः अत्रकत्राघाताः कत्रास्तासांत्रयंउत्तममध्यमाधमेषुयथासंख्यंमृकुस
मनिष्ठुरंसहद्भिः त्रिकरणरूपंत्रितयंयेषुनिपितेषुश्रृंगेषुएवंताडनइतितत्प्रकारज्ञः यथाहभोजः मृकुने
केनघातेनदंडकालेषुताडयेत् तीक्ष्णंमध्यंपुनर्न्मोभाजघन्येनिष्ठुरैस्त्रिभिः उपवेशोच्चनिद्रायांस्खलितेकुष्ट
चेष्टिते वडवालोकनौत्सुक्येवक्रगर्वितहेषिते संत्रासेचपुरुष्याने विमार्गगमनेभये॥ शिक्षासागस्यसुम
येसंजातेचित्तविभ्रमे दंडः प्रयोज्योवाहानांकालेषुद्वादशस्वपि ग्रीवायांभीतमाहमात्रस्तंचैवचवाजिना
म् विभ्रांतचित्तमधरेसक्त शिक्षंचताडयेत् प्रदेष्टितंस्कंधवाक्वौर्वडवालोकिनंतथा॥उपवेशेचनिद्रायां
कटिदेशेचताडयेत्॥कुष्ठेष्टितंमुखेहन्यात् कुर्गोमार्गस्थितंतथा॥जघनेस्खलितंहन्यात् नेत्रमार्गेकुस्थितम् यः
कुत्रप्रकृतिर्वाजी तंसर्वत्रैवताडयेदितिएवंभूतःसः श्रीहरिः उच्चैरुन्नतेनवरेणाश्वेनतेनाश्वेनचटुलश्चपलः अं
घ्रिपातः पादमासोयस्मिन् तद्यथातथाअर्द्धपुलायितेनत्रातार्द्धद्धंक्रमाड्डुच्चैर्मंडलायतवल्गितैः नन्मुखसास्त्रसुख
स्मगतिरर्द्धपुलायितमित्युक्तलक्षणेनमंडलगतिविशेषेण चित्रमद्भुतंयस्यदंपादक्रमंअचीकरत् अदीधपत्॥३५॥

हरिसं·
॥९॥

सुदेवेति देवमणयो निगालावर्त्ताः आवर्त्तो रोमतो देवमणिस्त्वेष निगालतः निगालस्तु गलोद्देश इति वैज
यंती उदधीकानि फलानि रासलाभादीनि यासां तास्तथाविधाः याः शुक्तयः शुक्तिसंस्थाना आवर्त्तविशेषा
स्तु ताभिः सह वर्त्तमानाः तदुक्तं वक्षस्थाः शुक्तयस्तिस्रः ऊर्द्ध्वरोमा जयावहा इति अथवा देवमणयः कौस्तुभा
दि देवमणयः उदधिकानि फलानि दुमलाभादीनि यासां तास्तथोक्ताः शुक्तयो मुक्तास्फोटास्तु ताभिः सहव
र्त्तमानाः मुक्तास्फोटे द्वयावर्त्ते शुक्तिः तुंगस्तकपालयोरिति यादवः पूर्णा निभृता अखिलाः समग्रा रंध्रदेशाः
सुदेवमणुस्फलशुक्तयोऽश्वागामाश्रुपूर्णाखिलरंध्रदेशाः ॥ आवर्त्तवंतो बुधयो द्भुवंतो विरोचमानाः प्रधुरूर्मि
भिर्वा ॥ ३६ ॥ पार्श्वभागा अत्र निम्नप्रदेशा येषां ते विशेषाः रोचमानाः कंगावर्त्ता येषां ते कं गतो रोचमानश्च स्व
स्तिसौभाग्यवर्द्धन इति वैजयंती अथवा विशेषेण रोचमाना दीप्यमाना इत्यर्थः आवर्त्तवंतः प्रत्रास्तदत्र व
र्त्तयुक्ताः प्रत्रांसायामतु पुष्पसयः तेच द्वावुरस्यौ शिरस्यौ द्वौ द्वौ रंध्रोपरंध्रयोः एकोनाभावपाते च दश आवर्त्ता
ध्रुवाः स्मृताः इत्युक्तादश ध्रुवाख्या विवक्षिताः अन्येषामनंतरमेव पृथगभिधानात् अथवा तु जलभ्रमवंतः
स्यादावर्त्तोंभसां भ्रम इत्यमरः रोमस्थाने तु तत्साम्यादुपदेशः तदुक्तं आवर्त्तसाम्यादावर्त्तो रामसंस्थानमंगि ॥९॥

सर्ग·१७

नामिति तरुमिभिर्गतिविशेषैः वीचिभिश्च भ्रुवंतो धावंतः पंक्तीकृतानामश्वानां न मनोल्लमनाकृतिः अतिवेग
समायुक्तागतिरूर्मिरूढाकृता इति वैजयंती ईदृशोऽश्वाः अंबुधयो वा समुद्रा इव वाजिनाद्वं द्वार्थे आशुलूर्णं
गां भूमिं प्यधुः छादयंतिस्म अपिधान तिरोधान पिधानाच्छादनानि चेत्यमरः अपिपूर्वाद्दधातेर्लङ् वष्टि भागुरि
रल्लोपमवाप्योरुपसर्गयोरिति कारलोपः एकनालावलंबि फलद्वयवदेकत्राश्वेनाश्वद्वयप्रतीतेरर्थश्लेषो य
प्रकृतगोचरः उपमालंगमिति संकरः ॥ ३६ ॥ अथ प्रकृतमाह अकृत्रिमेति क्रियया निर्वृत्तं कृत्रिमं तथाभूतं न
अकृत्रिमप्रेमनिमग्नचित्ता महामहं ते विदधुः समेताः ॥ उच्चारयंतो जयशब्दमुच्चैर्विचित्रतूर्यारववादिताशा
म् ॥ ३७ ॥ तौ सस्वजे स्वाप्यनिबद्धदृष्टी संबंधिसौ माँश्च यथोचितं सः ॥ पप्रच्छ सर्वानकुशलं ततस्तानशेषपक्षः
सापत्रपावलोकः ॥ ३८ ॥
भवंतीस कृत्रिमं तथाभूतं यत्प्रेम स्नेहस्तस्मिन्निमग्नानि चित्तान्यंतःकरणानि ये
षां ते तथोक्ताः प्रेमाकुलांतःकरणा इत्यर्थः उच्चैरुच्चस्वरेण जयइति शब्दमुच्चारयंतो वदंतः समेताः मिलि
तास्ते भक्तजनाः विचित्राणि नानाविधानि यानि तूर्याणि वाद्यानि तेषामारवः शब्दस्तेन नादिताः प्रतिध्व
निकारिताः आशाः दिशो यस्मिन् कर्मणि तद्यथा तथा महामहं महोत्सवं विदधुः चक्रुः ॥ ३७ ॥ ताविति स्वा

हरिसं. अत्रोपालिसमग्राणियानि दुःखानि जन्ममरणादीनि तेषामुपशमो निवर्त्तकः अवलोकोदर्शनं यस्य सर्ग. १७
॥८॥ सतथोक्तः सः श्रीहरिः स्वस्यआस्यंमुखंतस्मिन्निबद्धेस्थिरीकृतदृष्टिर्लोचनेयाभ्यांतौतथोक्तौतौसम्भ्रान्तौ
कर्मभूतौसम्बजेन्द्रालिलिंगपरिरंभणंकृतवानित्यर्थः अमानुसर्वान्संबंधिनश्चयथोचितंतव्रचितंयोग्य
मनतिक्रम्यसम्बजेततः परिरंभणानंतरंतान्कुशलंपप्रच्छपृष्टवान्प्रच्छतिर्द्विकर्मकः ॥२८॥ तैरिति ॥ त
दालोकनतः तस्यश्रीहरेरालोकनेवीक्षणंतस्मात् नष्टः तस्यश्रीहरेः योदीर्घो बहुकालिकोवियोगस्तेन
तैर्नष्टतद्दीर्घवियोगतीव्रक्लेशैस्तदालोकनतःप्रतीतैः ॥ सहाययौस्वालयमञ्जवारैः सतिग्मरश्मेरिववी
क्षणेन ॥२९॥ तस्योपकंठंप्रतिवासरंतेस्थित्वाभजंतस्तशुभकीर्त्तिंतानिमं ॥ दासंददीयोथविधायतस्यप्रवि
क्तितन्त्राप्रीमनिधिमुनीन्द्रः ॥३०॥ तीव्रोष्णःसहः क्लेशोयेषांतेस्तथोक्तैः अतएवतिग्मरश्मेः सूर्यस्यवीक्षणे
नअञ्जवारैः पद्मसमूहैरिवप्रतीतैःप्रसन्नैः तैःसमयूतापादिसंबंधिभिः भक्तगणैश्वसहस्वालयंस्वनिवा
सस्थानंआययौआजगाम ॥३१॥ तस्येति अथतदालयप्राप्त्यनंतरं तेसंबंधिनः तस्यश्रीहरेःउपकंठंसमी
पेस्थित्वाद्वितीयःअतिस्थिरंमुनीन्द्रैर्महायोगिभिरपिप्रविक्तितंप्राप्तुमिष्टंतस्यश्रीहरेःदास्यंपरिचर्यांविधा ॥८॥

नरूपंसेवकत्वंविधायकृत्वाशुभाश्रवणमात्रेणअघौघविध्वंसनपटीयसीयाकीर्त्तिः सेवत्तायाश्रीयस्यस
तथोक्तस्तमजायायानिदिः तिजायानाश्रयस्यनिद्रादेवः एतेनतस्यनैष्ठिककत्वाक्वचिंतरपरिग्रहोनाभूदितिसूचि
तमितिभावः शर्मनिधिंसर्वोत्कृष्टस्वरूपविधानंतंश्रीहरिंप्रतिवासरंप्रत्यहं अभजत् श्रवणकीर्त्तनादिल
क्षणभक्तिभिरसेवंत ॥३२॥ अथेति अथतद्बंधुजनागमनानंतरं एकदाएकस्मिन्समयेतस्यश्रीहरेःनिवर्त्त
नायदर्शनायदेशांतरेभ्यः समुपागतानांस्वसमीपमुपेयुषांद्वितीयाश्रमिणांगृहस्थानांआश्रितानांस्वान

अथैकदाप्रीव्रतिनांसमभ्यादेशांतरेभ्यः समुपागतानाम् ॥ तस्याश्रितानांचनिवर्णनायसतांद्वितीयाश्रमिणां
सुरम्या ॥३३॥ विधायतेभ्यस्तमवाप्तवसः पृथक्ऽभिषेकाद्विविधारमणपः ॥ सतत्रसिंहासनसंनिषण्णोरराजपू
र्णेन्दुरिवोडुमध्ये ॥३४॥ महारूणंप्राप्यतस्परिचर्यातस्यएणांम् व्रतिनांनैष्ठिकवतांब्रह्मचारिणाम् सतांचया
सुरम्यानअतिरमणीयासमसासभासमसापरिषद्गोष्ठीसभासमितिसंसदइत्यमरः आसीत् अभूत् ॥३५॥
विधायेतितस्यप्रिवर्णनायतंश्रीहरिंअवाप्तवसःप्राप्तवसः द्विविधाःसभर्त्तृकामृतभर्त्तृकाश्चेतिद्विविधाः
रमणपः स्त्रियः तेभ्यःपुरुषेभ्यः पृथक्भिन्नांसभामितिशेषः विधायकृत्वानिषेदुःतस्थुः तत्रसभायांसिंह

हरिसं· सन्नेसंनिषण्णः उपविष्टः सः श्रीहरिः उडूनां नक्षत्राणां यन्मध्यं तस्मिन् पूर्णेन्दुरिव सकलकलापरिपूर्णः पार्वणः चन्द्र सर्ग·१७
॥९॥ वैरीश्वरइवराजवद्भौ ॥८७॥ नवीनेति नवीनानि सूक्ष्माणि अतन्तूनि निश्चिभ्राणि सांद्राणि घनानि च वासांसि यस्य
सतथोक्तः विन्ध्यालयवक्षः स्थलं तत्र मालानां पुष्पाणां माला संसक्तेति तथोक्तः स्मेरं मंदहास्यं तेन सहितं मु
खारविंदं मुखकमलं यस्य स तथोक्तः हरिः निवर्णेनेनसदर्शनेन प्राप्तमदः प्रमुदं हर्षं येषां तान् तथोक्तान् ता
न् निजाश्रितभक्तजनान् जगाद उवाच ॥८७॥ मत्संनिधानमिति मयि विषये प्रतिस्थिरमति निश्चलं यस्त्रेमरूपं हि

नवीनसूक्ष्मातन्तुनसांद्रवासा विन्ध्यालवक्षःस्थलमाल्यमाली ॥ जगाद सस्मेरमुखारविंदो निवर्णनेप्राप्तमुदो हरि
स्तान् ॥८७॥ मत्संनिधानं मपि महिदृक्षा दूतांतरोत्सवीयमुदस्य देन्द्राम् ॥ प्राप्तातिमोदं धुजनैरुपेतावतिष्ठिरप्रेमनि
बद्धचित्तो ॥८८॥ जलादिवस्थातुमयं नवाक्तोमी नवजोमलवुभधर्मवंशः ॥ अस्मात्वविज्जिन्नतयानवर्त्तेनत्राष्ट्रादि
वार्थोऽहमपिक्षणार्द्धम् ॥८९॥ तेन निवद्धेपरवत्री भूते चित्ते अतः करणीययोस्तेः प्रत एवममदिदृक्षादर्शनेच्छा
तेन हृते प्राकृष्टे अंतरे मनसीययोस्तौ तथोक्तो कोइमो मद्भक्तांतरोत्सवीयं निजं देन्द्रां कोन्द्राला भिधं जनपदं स्वदस्यस
क्ताबंधुजनैरुपेतौ युक्तौ संतौ मत्संनिधानं ममसमीपं प्राप्तोपपन्नौ ॥८८॥ जलादिति अयं पुरोवर्तीशुभो ॥९॥

मंगलरूपो धर्मवंशः मीनवज्जो मत्स्यसमूहो जलात् नीरादिव मत्प्रत्तो भिन्नतया पृथक्कृतया स्थातुं न शक्तः म
मथेनास्ति अहमपि यस्मात् धर्मवंशात् न शक्नोत् अर्थक्षणं वक्तु चित् कर्हिचित् क्षणस्पार्द्धमसल्पकालमपि भि
न्नतयानवर्त्ते सदा सल्लत्तयैवास्य स्थितः रूप्यर्थः नित्यसंबंधयोः शब्दार्थयोरुपमानत्वेनोपादानान्नित्यः शब्दा
र्थसंबंध इति मीमांसकाः अत्रोपमालंकारः स्वतः सिद्धेन भिन्नेन संमतेन च धर्मतः यत्रसाम्येन वर्ण्यस्य वा
च्यं वेदेकदेशोपमेति लक्षणात् प्रायिकस्त्वायमलंकारः ॥८५॥ असाविति महेन सोमं महापापानां क्षपणेनि

असौ महेनः क्षपणावलोकः सद्भिर्मदीयैश्च गृहाश्रमस्थैः ॥ मामोर्च्चनीयो भवसिंधुपारं जनाः पुरायांति सम
र्हणेन ॥८६॥ अयं द्विजत्वेन जना च मुक्त्यै प्राङ्भवं क्षोणितले प्रपन्नः ॥ अजस्त्रमस्मिन् सहभक्तिधर्मौ स्थि
तौ पवित्रेण निजान्वयेन ॥८७॥ एसकः असौ धर्मवंशः मदीयैः सद्भिः साधुभिः गृहाश्रमस्थैश्च मामः अ
र्च्चनीयः यथो चितं पूजनीयः किंवजनाः अस्मेतिनोषः समर्हणेन पूजनेन भवसिंधुपारं संसारसागरांतं पुरा
यांति यास्यंतीत्यर्थः यावत्पुरानिपातयोर्लडिति निपातपुराशब्दयोगे भविष्यति लट् ॥८६॥ अयमिति क्षो
णितले भूतले जनानामवमुक्तिः संसारमोक्षस्तस्यै अयं धर्मवंशः द्विजत्वेन विप्रत्वेन प्राङ्भवमुदयं

प्राप्तः किंच अस्मिन् धर्मवंशेपवित्रेणपूतेन नित्तान्वयेन ज्ञानवैराग्यादिरूपेणस्ववंशेनसहभक्तिधर्मोऽत्र
स्तं निरंतरंस्थितोऽस्तः तस्मादेतद्विविधानेनसंसृतिमुक्तिर्भवसेतिभावः॥ ४७॥ यावदिति अत्र अस्मिन् ध
र्मवंशेक्षीरनिधौक्षीरसमुद्रे इंदुरिवचंद्र इवयगुणैर्धर्मज्ञानादिभिः अनूनः अन्यूनोयः क्षमासुरो भूदेवोवि
प्र इतियावत् यावज्जवतिभविष्यतीत्यर्थः अग्रजानां विप्राणांपुरःसरेमुख्येतत्र तस्मिन्विप्रेऽत्यादरोमहांतो

यावज्जवसत्रगुणैरनूनःक्षमासुरःक्षीरनिधाविवेंदुः॥ यःस्यात्सतस्तत्रसदाग्रजानांपुरःसरेभक्तिनृपाऽतुदारो॥ ४८
स्थितिंगतोयत्रसहान्वयेनता वीश्वरस्तिष्ठतितत्ररूपः॥ ज्ञेयःसमस्तेनतदीयवंशेगतस्मयानांभवतांनिषेव्यः॥ ४९
सवंशधर्मेतरयोर्विशेषोविषद्रुकल्पागमयोरिवास्ति॥ जानातिसाम्यंकुमतिस्तयोर्यःसवासुदेवाद्विमुखोमदीयैः॥ ५०

भक्तिनृपोभक्तिधर्मोसदा निरंतरंस्थास्यतः स्थितिंकरिष्यतः॥ ४८॥ स्थितिंगतावितियत्रयस्मिन् धर्मकुलेऽसन्नेवि
प्रेअन्वयेनवंशेनसहसार्द्धंतौभक्तिधर्मौस्थितिंनिवासंगतौप्राप्तौभवतः तत्रतस्मिन्नीश्वरः सर्वनियंताहरूपः श्री
कृष्णःतिष्ठतिअतएवतस्यधर्मस्यायंतदीयःसवासौवंशश्चतथोक्तः तेनधर्मेणसमस्तुल्याक्षेयोवेद्यः गतस्मया
नांगताभिमानानांभवतांयुष्माकम् कृष्णानांकर्तास्विति कर्त्तरिषष्ठी निषेव्यःपूजनीयः॥ ४९॥ सवंशेति विषद्रु॰ 

र्विषवृक्षः कल्पागमः कल्पतरुस्तयोरिवसवंशायोः सान्वययोः धर्मोनृपः इतरः अधर्मस्तयोः विशेषोभेदो
ऽस्तिकयोः संसृतिमुक्तिनरकपातभवभ्रमणहेतुत्वान्महदंतरमस्तीत्यर्थः योजनस्तयोर्धर्माधर्मयोः साम्यंसाह
श्यंजानातिसकुमतिः कुत्सितबुद्धिःजनः मदीयैर्मदाश्रितैर्वासुदेवात् विमुखोबहिर्मुखोज्ञेयइतिशेषः॥ ५०
मयेतिमयागुरुत्वेमहत्त्वेसर्वजनमान्यत्वेऽधिकृतस्यनियुक्तस्य अतएवयोयुष्माकंमान्यस्यमाननीयस्य
अस्यधर्मकुलस्यपूजांपुष्पचंदनवासोऽलंकारप्रभृतिभिः सपर्या अत्रलोकेयोजनःविधास्यतेकरिष्यतेस

मयागुरुत्वेधिकृतस्यपूजा मत्राप्यमान्यस्यविधास्यतेवः॥ सयोभवप्येष्यतिनीसाश्रीः सनाविकांनावमिवेस
पारम्॥ ५१॥ एतत्सपर्योविदधत्सुरैनिकृष्णादिपूजाफलमस्युदारम्॥ एतद्विनोयःपरिपूतवंशोविमोक्ष्यते
भाग्यरिद्वतभीतेः॥ ५२॥
जनः नाविकेननौनियोजकेनसहवर्त्तमानांनावंतरीरस्यप्राप्यनीराश्रीः समुद्रमे
वभवस्यसंसारस्यपारंअंतंएष्यतिप्राप्स्यति॥ ५१॥ एतदिति एततत्धर्मकुलंश्रितः आश्रितः एतस्यधर्मकु
लस्यसपर्याविविधोपचारैर्यथाविधिपूजांविदधत्कुर्वन्यःजनःसः असुदारं अतिमहत् कृष्णस्या
दिदेवांतदीयभक्तभक्तिधर्मादीनांतेषांपूजायाः फलंपुरैतिप्राप्स्यतिकिंचपरिपूतोतिविशुद्धोवंशोयस्य

हरिसं· सतथोक्तः सनुभास्करीः सूर्यपुत्रोयमराजस्तस्य दूताः किंकरास्तेभ्योयाभीतिर्भयंतस्याः विमोक्ष्यतेनिमु सर्ग-२७
॥११॥ क्तोभविष्यति॥४३॥एतदिति अतुलोऽनुपमः प्रतापोयस्यसतथोक्तः वासुदेवः कलेवरांतेदेहावसानस
मयेयेएतत् धर्मकुलंश्रिताः नराएणंप्राप्तास्तेभ्यः स्वस्यदर्शनंविलोकनंदास्यवितरिष्यतिहिनिश्चितम् ता
न्धर्मकुलाश्रितान् सृतितः संसारात्विमोच्ययित्वानित्तंस्वकीयंपदंअक्षराख्यंधामनयिष्यतिप्रापयि

एतच्छ्रितेभ्योऽहिकलेवरांतेस्वदर्शनंदास्यतिवासुदेवः॥विमोचयित्वासृतितोनितंतानुपदंनयिष्यत्यतुलप्रतापः
४३॥निपायतद्वक्त्रविधुस्रुतंतेवचोमृतंतस्मधुकर्णकंसैः॥ववंदिरेतत्ररतिंप्रपन्नास्तदीयमाहात्म्यविदोमुकुन्दम्
४४॥रामप्रतापस्यकृतेषुयोध्याप्रसादमात्मावरजात्मजेषु॥हरिर्विदित्वारघुवीरगोत्रंगुणैर्गरीयांसमुदारकीर्तिः
४५॥
ष्यति॥४३॥निपीयेति तस्यश्रीहरेः मुखंधियन्माहात्म्यंतद्विंदंतीतितथोक्ताः तेभक्तजनाः तस्यश्रीहरेर्यं
द्वक्त्रंमुखंतदेवविधुश्चंद्रस्तस्मात् स्रुतंगलितंयत् श्रेयस्करत्वाच्छ्रेष्ठम् मधुमधुरंपिष्टमिसर्थः वचोमृतंवचन
पीयूषंकर्णाएवकंसाःपात्राणितैः निपीयतत्रधर्मकुलेरतिंप्रीतिंप्रपन्नाः प्राप्ताः संतः तंश्रीहरिंमुकुंदंपुन
पुनर्ववंदिरेनेमुः॥४४॥संप्रतितद्विहिताचार्यप्रतिष्ठामाहयुग्मेनरामप्रतापस्येतिजीवानांहितमक्षरधाम ॥११॥

प्रापणरूपंतदर्थमवतारोयस्यसतथोक्तः दयांबुधिर्दयासागरः उदारामहतीकीर्तिर्यशोयस्यसतथोक्तः हरिः
श्रीहरिः रामप्रतापस्यस्वज्येष्ठभ्रातुः कृतेषुपुत्रेषुमध्येअयोध्याप्रसादंगुणैर्धर्मज्ञानविद्याविनयादिभिर्गरीयां
सेमतिश्रेष्ठंविदित्वाज्ञात्वाआत्मनः स्वस्यावरजइच्छारामस्तस्यानुजस्तस्यात्मजाः पुत्राः तेषुमध्येरघुवीरइतिगो
त्रंनामयस्यतंतथोक्तम् स्वानुजपुत्रंगुणैः पूर्वोक्तैः गरीयांसंविदित्वाआत्मसमाश्रितानांस्वाश्रितभक्तजनानां

विभज्यसन्मंदिरभूरिदेशांस्ताभ्यांनिजाचार्यपदंदिदेशा॥धर्मावनायात्मसमाश्रितानांदयांबुधिर्जीवहितावतारः
४६॥त्रिक्षापत्रमनुरोधतः प्रतिदिनंस्वेवर्त्तनीयाः सर्वाप्राचेयस्मिन्निति श्रिताधिनाममनस्तावुभौकोस्वाहया॥इत्थं
वर्त्तनतस्यौनिजजनांस्तोवर्त्तयंतोहरेः सेवांचक्रतुरोत्रितुः प्रसनसोऽद्रुः स्वांतदूरस्थितेः॥४७॥
धर्मावनायधर्मर
क्षणायताभ्यांरघुवीरायोध्याप्रसादाभ्यांनिजंस्वकीयंपदाचार्यपदंस्वकीयगुरुपदवीमिसर्थः दिदेशवितताार
संतिश्रेष्ठानियानिमंदिराणिलक्ष्मीनारायणादिदेवालयानिभूरयोबहवोयेदेशाजनपदाश्चतान्विभज्यविभा
गंविधायदिदेशंददो॥४६॥त्रिक्षापत्रीतिश्रितानामाधिमानसीव्यथांनाशयतीतितथोक्तः सः श्रीहरिःस्वा
ज्ञयानुजस्ताकोस्वनिदेशोद्रीतिमंतोप्रमितोक्तकाभ्यांतृतीयावेतितृतीयाताचयोध्याप्रसादरघुवीरोवांयुवा

ध्यांत्रिशिक्षापत्रमनुरोधतःत्रिशिक्षापत्रमुदितधर्ममर्यादानुसारेणप्रतिदिनंप्रतिवासरंस्वसंवर्त्तितवंतःस्वस्वकीयाः
श्रितजनाश्चवर्त्तनीयावर्त्तयितव्याःइत्यमुनाप्रकारेणप्रोचेऽथाचचक्षेइत्थंवर्त्तनेनतस्यैतौनिजाःस्वकीयायेजना
स्तानुवर्त्तयंतौत्रिशिक्षापत्रयुक्तमार्गेप्रवर्त्तयंतौतथोक्तौतौऽभयोध्याप्रसादरघुवीरौप्रमनसौप्रसन्नांतःकर
णौसंतौर्ध्रितुःसर्वेनियंतुःकृष्णानिस्वांतानिमनांसियेषांतेदुःस्वांतास्तेभ्योदूरेदूरदेशेस्थितिर्यस्यसतथोक्त
स्तस्यहरेःश्रीहरेःसेवांपरिचर्यांचक्रतुर्विदधतुःशार्दूलविक्रीडितवृत्तंलक्षणंतूक्तंप्राक्॥ ४७ ॥इतिश्री

इतिश्रीहरिसंभवेमहाकाव्येहर्ष्यकेकविश्रीमदचिंत्यानंदवर्णिकृतेश्रीहरिप्रियसखास्त्यादिवर्णनना
मासप्तदशःसर्गः॥ १७ ॥

पदवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्मजदीनानाथभट्टवि
रचितश्रीप्रत्यक्षवासुदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमुनेःततःश्रीरीतिमतिमाधवदा
ससत्सहायव्यासावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथकृतश्रीहरिसंभवकाव्यविवृ
ज्ञनाख्यादिमारसमाख्यायांसप्तदशःसर्गः॥ १७ ॥श्रीनीलकंठायसहजानंदायमाधुरीमूर्त्तयेनमोनमः
लि॰ रावलजेगमोराजी संवत् १९५६ नाफागण शुदि १३ नेचंद्रवासरेश्री मेंथाणग्रामेसमाप्ता॥॥